This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः। अथोद्धारपालमंत्राः प्रदर्श्यंते। इत्यत्यागंते। श्रीसूक्तंपवमानंचसोमसूक्तंसुमंगलं। शांत्याध्यायंचेंद्रसूक्तंरु
द्रंचेतिद्वादशर्चो।१। श्रीसूक्तंहिरण्यवर्णमितिपंचदशर्चं। पावमानंस्वादिष्टयेत्यादि। सोमसूक्तंत्वंसोमप्रचिकितइत्यादित्रयो
दशर्चं। सुमंगलंकनिक्रददित्यादि। शांतिकाध्यायः। इंद्रसूक्तंत्राग्नइंद्रइत्यादि। रुद्रंघृणुचपाजइत्यादि।१। दक्षिणेभ्रुवपा
लोतुरुद्रावपुरुषसूक्तकं। श्लोकाध्यायंशुक्रियंचमंडलाध्यायमेवच।२। रुद्रसूक्तंनमस्तइत्यादिमंत्रान्। पुरुषसूक्तंसह
स्रशीर्षेतिषोडशर्चं। श्लोकाध्यायंदेवसवितरित्यादिकं। शुक्रियंऋचंवाचमित्यध्यायः। माध्यंदिनानांतुमंडलब्राह्मणंघृणि
र्यं।२। वामदेव्यंबृहत्सामज्येष्ठसामरथंतरं। तथापुरुषसूक्तंचरुद्रसूक्तमतःपरं। आज्यदोहानिसामानिशांतिकाध्या
यमेवच। आरुंजानिचसामानिपश्चिमेद्वारपालके।३। वामदेव्यंऋचंगीतं। कयानश्चित्रं। बृहत्सामत्वामिद्धिहवामइत्यं।
रथंतरंअभित्वाशूरनोनुमइत्यसां। पुरुषसूक्तंसहस्रशीर्षेत्यादि। रुद्रसूक्तं। आवोराजानमितिवर्गद्वयं। आज्यदोहानिदे
वव्रतानीत्यादि। शांतिकाध्यायंअग्नेव्योध्यग्निरित्यादि। आरुंडानिइमंस्तोममित्याद्यसुगीतानि।३। अथवांगिरसंनीलरुद्र
चेवापराजितं। देवींचमधुसूक्तंचरोधसंशांतिकाध्यायं। अथवणोद्वारपालोपवतामुत्तरेश्रितो।४। अथवांगएंदो

Acc-No: 1892 M1147.
Title:- दुर्गाभाष्य.
Author:- वेदनाथ
Subject:- वैदिक
पत्रे (8)

K K S U LIBRARY
RAMTEK
441 106
M-1147
Dist Nagpur

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गायद्वदङ्गायेत्यादि। आंगिरसंअंगिरोजन्मनीत्यादि। नीलरुद्रंयारुद्रपत्न्याइत्यादि। अपराजितंदेवीयरिवर्म्मनीत्यादि। मधु
सूक्तंमधुवाताऋतायतइत्यादि। शेषसंज्ञमथर्वद्यावापृथिवीइत्यादि। रणंतिकाध्यायःशन्नइंद्राग्नीभवतामित्यादि। इति
द्वारपालजपमंत्राः॥ ॥अथसूक्तजपमंत्राः॥ ॥पृथद्वारे। रात्रिसूक्तंरुद्रंचपावमानंसुमंगलंपौरुषंतुअथदनाज्ञपय्य
र्वस्त्रैः पृथक्॥१॥ रात्रिसूक्तंरात्रीमख्यदायतीतिऋचं। रुद्रंइमारुद्रायतवसेतिसूक्तं। दक्षिणद्वारे। रणंक्रुद्रंवसोमयं
चकोमांडंजातवेदसंसोरंचेतिजपेतांद्वौदक्षिणेनयजुर्विदः॥२॥ रणंक्रुआरुक्षःशिखानइत्यादि। रुद्रं। इमारुद्रायतवसं
त्यादिसूक्तंवलुप्तयं। सोम्यंसोमोधेनुमितिषडृचं। कूष्मांडंयद्देवाइतिक्रुक्त्वयं। जातवेदसंयज्ञायज्ञइत्यनुवाकः। सो
रंविभाडित्यनुवाकः॥ पश्चिमद्वारे। विराजंपौरुषंसूक्तंसोपर्णरुद्रसंहितां। शेषावंपंचनिधनंगायत्रंज्येष्ठसामचवा
मदेव्यंवृहत्सोम्यंरौरवंसरथंतरं। गवांव्रतविकीर्णंचराक्षाघ्नंचयन्नास्तथा। गायेयुःसामगाराजंपश्चिमद्वारमाश्रिताः॥३॥ नष्टे
विराजंपिबासोममिति। सोपर्णउच्चैदक्षि०। रुद्रसंहिता। आवोराजानमिति। शेषावंउच्चातिजातवेदसामितिगीतं। पंच
निधनंरहस्यंगीतं। गायत्रंतत्सवितुरित्यस्यागीतं। ज्येष्ठसामस्तुधानंदिवइतिप्रासत्यं। वामदेव्यंकथानश्चित्रं। सोम्यंसोम

व्रतंसंतेपयांसि। शैरवंपुनःपुनर्माग्ने। रथंतरंअभित्वाशूर। गवांव्रतंतेमन्वता। अग्निमीळेगीतं। विष्णोर्गीतं। रक्षोघ्नंअग्नेर
क्षाणः। महाव्रतंदिव्यंगीतं॥३॥ उत्तरद्वारे। जपेतामथर्वाणोभूतिकंपोष्टिकंतथा। अंतेवरुणसूक्तंजपेयुःसर्वएवहि॥
शन्नइंद्राग्नी०। कद्रुद्रायप्रचेतसे०। आतेपितर्मरुतां०। त्रिषिधातुर्देवसवितः०। तत्त्वायामि०। रुद्राध्यायंपठेत्॥ अथाग्निस्था
पनं। द्वारपालाः जापकाःमंत्राः। ततःपूर्वादिक्रमेणप्रतिद्वारंवेदक्रमेणद्वारपालानुपवेश्य। एवमेवप्रतिकुंडंद्वौद्वौद्वारपाला
नुपवेश्यततः द्वारपालाः पठध्वमितिपाठकाःपठध्वमितिवा। होतारोयजध्वमितिहोतॄन्। जपध्वमितिजापकांश्चविनियुज्य
स्वयमीशानकुंडेउपविशेत्॥ इतिमंडपद्वारसूक्तजपमंत्राः॥ ततःअन्वाधानोक्तरीत्यासर्वंहोमंकुर्यादिति। अथ यहु
होमः॥ ततोवास्तुदेवताहोमः। ततःसर्वतोभद्रदेवताहोमः। ततःपर्यायहोमः। एवंहोमंसंपाद्यप्रतिपर्यायंदेवंसंपातोदकेनस्नु
पयेत्। पंचोपचारैःपूजयेच्च। ततोयजमानोमुकुटकटकांगुलीयकंकायनीयवासांसिऋत्विग्भ्योदद्यात्॥ ॥इतिद्वारसूक्त
मंत्रजपप्रकारः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीमन्महागणाधिपतयेनमः॥अथशुक्लयजुर्मुख्यलेखंयांतरप्रमाणानिलिख्यंते।तत्रब्राह्मणमंत्रोलिख्यते।ॐपूर्णमदः
पूर्णमिदंपूर्णात्पूर्णमुदच्यते।पूर्णस्यपूर्णमादायपूर्णमेवावशिष्यतेॐखंब्रह्मखंपुराणंवायुरंखमितिहस्माहकौरव्यायणी
पुत्रोवेदोयंब्राह्मणाविदुर्वेदिनोयुवेदितव्यं॥१॥त्रयःप्रजापत्याः॥ब्राह्मणं॥अथसर्वानुक्रमणीसाध्यं॥इहभगवान्कात्यायन
नाचार्यःसर्वानुक्रमसूत्रप्रारंभेप्रथमंमंगलाचरणपूर्वकंयजुर्वेदस्यमुख्यत्वंऋषिछंदोदेवतज्ञानार्थंप्रतिज्ञासूत्रमाह॥मंडलं
दक्षिणमक्षिहृदयंचाधिष्ठितंयेनशुक्लानियजूंषिभगवान्याज्ञवल्क्योयतःप्रापतंविवस्वंतंत्रयीमयमर्चिष्मंतमभिधायमा
ध्यंदिनीयेवाजसनेयकेयजुर्वेदाम्नायेसर्वैसखिलेसशुक्लियेऋषिदेवतछंदांस्यनुक्रमिष्यामइति॥तत्रेयमन्वयः॥वयं
कात्यायनाचार्याःयजुर्वेदाम्नायेऋषिदेवतछंदांस्यनुक्रमिष्यामः॥मंत्रद्रष्टारोऋषयः।देवतानिमंत्रांतर्गतानि।छंदांसि
गायत्र्यादीनि।एतानिवक्ष्यामः॥नन्वत्राचार्येणयजुर्वेदाम्नायेइत्यभिधानात्आम्नायशब्देनवेदःयजुर्वेदश्चासौआम्नाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चेत्यंसमासोनघटते। तस्माद्यजुर्वेदपदेनैवसिद्धिस्तस्मादाम्नायपदंनवाच्यमिति चेत्। आचार्यवचनस्यकिंव्यर्थतास्या
त्। न। आचार्येणाम्नायशब्दोमुख्यवेदद्रष्टव्यः। आम्नायंश्रुतिमुख्ययोरित्यभिधानात्॥तस्मादाम्नायपदंगृहीतं। तत्रेत्थंसमासः।
यजुर्वेदः आम्नायः यजुर्वेदाम्नायः तस्मिन्यजुर्वेदाम्नायेऋग्वादिकंवक्ष्यामइत्यर्थः॥ननुयजुर्वेदस्यषडङ्गीतिभेदात्मकत्वादाम्ना
योमुख्योनज्ञायतइतिकस्मिन्यजुर्वेदाम्नायेइत्यतस्तंविशेषयति। वाजसनेयकइति। वाजसनेयानामपिपंचदशभेदात्मकत्वान्न
ज्ञायतेइत्यतस्तंविशेषयति। माध्यंदिनीयकेवाजसनेयांतरभेदेमाध्यंदिनीयसंज्ञेयजुर्वेदाम्नायेइत्यर्थः। आम्नायोमुख्यः। अ
त्याम्नायस्तस्यद्वितीयःप्रकारः। विधिर्मुख्यः। प्रतिविधिस्तस्यद्वितीयःप्रकारः॥ द्वितीयइत्यादावपिमुख्यामुख्यसंज्ञेयं॥यजु
र्वेदलक्षणंशौनकेनोक्तं॥ मंत्रब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यते॥यजुर्वेदःसविज्ञेयोऽन्येशाखांतराःस्मृताः॥१॥ एतद्वचनं
लक्षणंविनाज्ञातुंनशक्यतेऽतोऽस्माभिर्व्याख्यायतेक्रियते॥मंत्रस्यब्राह्मणस्यचवेदसंज्ञाइत्यर्थः॥तथाचकात्यायनस्यवेदलक्षणं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधिर्विधेयस्तर्कश्चवेदइति।।विधिर्विधायकंवाक्यं।विधेयोमंत्रः।तर्कोऽर्थवादइतित्रयाणामपिवेदसंज्ञा।एतत्त्रयंब्राह्मणएवपठितं।।सोसावाज्यमधिश्रयतीतिविधिः।इषेत्वेतिविधेयोमंत्रः।वृष्टयेतदाहनदाहषेत्वेत्यर्थवादस्तर्कश्चेत्यादिज्ञेयं।तथाचयाज्ञवल्क्यशिक्षायां।।अथत्रिसांप्रवक्ष्यामियाज्ञवल्क्यःपरिस्फुटं।।यजुर्वेदस्यमंत्राणांसम्यक्पाठस्यसिध्ये।।१।।प्रणवंव्याहृतीस्तदनंतरं।।सावित्रींचानुदर्शनतोवेदादिमारभेत्।।२।।इतिसंहितामंत्रस्यब्राह्मणस्यचवेदत्वमुक्तं।।त्रिगुणंयत्रपठ्यतेयत्रमंत्रब्राह्मणात्मकेवेदेमंत्रब्राह्मणएवपंक्तेयत्रऋषिछंदोदेवतविनियोगात्मकंत्रिगुणंयस्मिंश्चरत्वारिंपठ्यतेसयजुर्वेदीमुख्यः।अन्येशाखांतराणि।।त्रिगुणलक्षणंगुह्यमालायांमुक्तं।।माध्यंदिनीयजुर्वेदेखंब्रह्मेतमुदाहृतं।।तारहर्वेहित्रिगुणंनान्यशाखासुमुख्यतः।।१।।ॐखंब्रह्मतथाचपाराशरः।।समाप्तावुत्तरादीर्यन्मंत्रब्राह्मणयोर्द्विजाः।।ॐखंब्रह्मेतियोध्यायेन्नर्कश्चोपवधसः।।२।।तथाचयोगयाज्ञवल्क्यः।।ॐकारसंज्ञंत्रिगुणंत्र्यक्षरंचत्रिदैवतं।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिब्रह्मसुत्रिषुस्थानंत्रिकल्पंत्रिप्रतिष्ठितं॥१॥सत्वंरजस्तमश्चेतित्रिगुणंतेनसंस्मृतं॥अन्यच्च॥ओंकारस्त्रिगुणःप्रोक्तःखंब्रह्मत्रिगुणंस्मृतं॥माध्यंदिनीयशाखायांयजुर्वेदंपठंतिहि॥१॥ऋषीन्प्रतिब्रह्मोपदेशः॥पराशरोक्तत्वाद्वेदार्थपारंगतभगवताकात्यायनाचार्येणमाध्यंदिनीयसंज्ञेयजुर्वेदाम्नायलान्मुख्यत्वमुक्तं॥इतिसर्वानुक्रमण्यांप्रथमकंडिकाभाष्यं॥ श्रीः॥ॐ

(यांहोलीर)

अथप्रतिज्ञासूत्रभाष्यं॥स्वरसंस्कारयोश्छंदसिनियमात्सवेदेभवतीत्यतोवेदलक्षणमाचष्टे॥मंत्रब्राह्मणयोर्वेदनामधेयं॥मंत्रश्चब्राह्मणंचतयोर्वेदनामधेयं॥तदुक्तंपरिशिष्टे।मंत्रब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यते॥यजुर्वेदःसविज्ञेयोऽन्येषांखांतराःस्मृताइति॥तथाचवेदोद्विधा।मंत्रात्मकोब्राह्मणात्मकश्च।तत्राद्यःकर्मांगस्तद्द्रव्यदेवतादिस्मारकः।मंत्रेणस्मृतंकर्मकर्तव्यमितिनियमार्थवचनं।मंत्रांतेःकर्मादिःसंनिपात्योधिधानादितिकल्पकृदुक्तेः।सचसंहितादिरूपइत्यादिः।नचवसंतायकपिंजलानालभतइत्यादिकस्यापिमंत्रत्वापत्तिरितिवाच्यं॥नवयंसकलस्येवेत्यादिकस्यमंत्रत्वंब्रूमः॥किंतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणसागव्यतिरिक्तस्य ॥ ब्रह्मणेब्राह्मणमितिब्राह्मणाध्याय इत्यध्यायक्रयस्यब्राह्मणत्वमाचार्यैरुक्तंतथापिमंत्रधर्मिः सर्वेषि
वंतीमंत्रांतर्गतत्वात् । एवमेवब्राह्मणांतर्गतमंत्रसागानामपिब्राह्मणधर्मा एवसंतीति । द्वितीयश्चतुर्थी । विधिनिषेधार्थवादना
मधेयात्मा । इतिप्रतिज्ञासूत्रसाध्यमनंतदेवकृतं ॥ अथेदानीमेवंविधसाध्यकरणसंगीनिरूप्यते । चतुर्णांमध्येआदौकोवेदोव्या
ख्येयः । आकर्णय । आदौयजुर्वेदोव्याख्येयः । तथाहि । यद्यपिपाठक्रमेणलोकरूढ्याऋग्वेदः प्रथमंव्याख्येयः तथापिअर्थक्रमब
लेनहोमयवागुपाकन्यायेनचयजुर्वेदः सर्वैरादावपेक्ष्यते । तथाहि । बह्वृचैश्छंदोगैराथर्वणिकैश्चआदौइषेत्वेत्यादिनीसान्ना
य्यविनियुक्तानिकर्मणेवांवेषायवामित्यादिनिपुरोडाशादिविनियुक्तानिचयत्तंषिसमादायवेधांसंस्कृतायांबर्हिरास्तरणं
प्रस्तरादीस्रुक्स्रुवस्थापनंतदंतिकेपुरोडाशस्थापनांतमाध्वर्यवंकृत्वाहोत्रेदनंप्रोक्तऋग्वेदापेक्षा । इधुमग्निध्मोदो
एतादृक्कर्मानंतरमोद्गात्रापेक्षा । एवंयाजुषतदंतरसर्वशाखासंप्रदायः । अतएवऋक्सामवेदसंहितयोर्नदर्शपूर्णमासा
द्याध्वर्यवमंत्राअधीतास्तेचावश्यकाः । तस्मादादौयजुर्वेदव्याख्यातत्रापिब्राह्मणमादौव्याख्येयं । ब्राह्मणार्थज्ञप्तेः संहिता ३

ब्राह्मण ४

व्याख्यानसानुकूल्यत्वात् । ब्राह्मणेनहिमंत्रावि नियुज्यंतेव्याख्यायंतेच । ततः ऋग्वेदब्राह्मणसंहितेव्याख्येये । ब्राह्मो मीयेहो
त्रापिसानुकूल्यापेक्षा । अतावपेक्षितग्रंथव्याख्यायाः उचितत्वात् । ततश्छंदोगयर्थायसामवेदसंहितेव्याकर्तव्ये । ततः
परिशेषादथर्वणब्राह्मणसंहिते । सर्वत्रादौब्राह्मणसाध्यं संहितासाध्यानुकूलत्वात् । एषामर्थादासर्ववेदसाध्यकरणेएकस्मे
वोपस्थितेसति । अन्यथास्वशाखामधीत्यपरिज्ञानीसन्स्वशाखांसंहितेव्याकुर्यात् । अध्ययनकालेपिस्वशाखामादावधी
त्यततः क्रमापेक्षांकुर्यात् । बह्वृचानांनेषविचारः क्रमस्यस्वतः सिद्धत्वात् । स्वाध्यायाध्ययनेचैवब्रह्मयज्ञेचकर्मणि ॥ आनीर्वि
देपुराप्रोक्तास्वशाखानात्रसंप्रायइतिशास्त्रात् । एवंसर्ववेदसाध्यकारस्यसायनाचार्यस्यपंथानंतन्नद्राघोपो द्योतमक्रि
यायामुपलप्सामहे ॥ इतिश्रीरङ्गराजाध्वरींद्रविरचितायांचंद्रिकायामुपोद्घातप्रकरणे ॥ आदित्यानीमानिशुक्लानियजूंषिवाजसनेयेनया
ज्ञवल्क्येनाख्यायंतइति । अस्यार्थः । आदित्यादधीतान्यादित्यानि । शुक्लानिशुद्धानि । वाजस्यान्नस्यसनिर्दानंयस्मात्सवा
जसनिर्मुनिः तदपत्यंवाजसनेयः तेनयाज्ञवल्क्येनर्षिणाख्यायंतेकथ्यंतइत्यर्थः । तत्रमाध्यंदिनेनमहर्षिणालब्धो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यजुर्वेदशाखाविशेषोमाध्यंदिनः। यद्यपियाज्ञवल्क्येनबहुभ्यः शिष्येभ्यः उपदिष्टतथापिईश्वरकृपयामध्यंदिनसंबंधित
यालोकेप्रज्ञायते।तस्मान्माध्यंदिनवेदंयेधीयंतेवेदंतेवाशिष्यपरंपरयावर्तमानास्तेपिमाध्यंदिनाउच्यंते।इतिवैद्यनाथमि
श्रकृतइष्टसाध्ये॥

KKSU LIBRARY
RAMTEK
441 106
M-1147
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 16:09
,TRANSFERRED=2020/10/22 at 16:11:14
,PAGES=8
,TYPE=STD
,NAME=S0004419
,Book Name=M-1147-DRISHTIBHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection